Book 2

# Mārkandeya Purāṇa

क्रौष्टुकिरुवाच ॥ कति द्वीपाः समुद्रा वा पर्वता वा कति द्विज ॥ कियन्ति चैव वर्षाणि तेषां नद्यश्च का मुने ॥ १ ॥ महाभूतप्रमाणं च
लोकालोकं तथैव च ॥ पर्यासं परिमाणं च गतिं चन्द्रार्कयोरपि ॥ २ ॥ एतत्प्रब्रूहि मे सर्वं विस्तरेण महामुने ॥३॥ मार्कण्डेय उवाच ॥
शतार्द्धकोटिविस्तारा पृथिवी कृत्स्नशो द्विज ॥ तस्याः संस्थानमखिलं कथयामि शृणुष्व तत् ॥ ४ ॥ ये ते द्वीपा मया प्रोक्ता जम्बुद्वी-
पाद्या द्विज ॥ पुष्करान्ता महाभाग शृण्वेषां विस्तरं पुनः ॥ ५ ॥ द्वीपात्तु द्विगुणो द्वीपो जम्बुः प्लक्षोऽथ शाल्मलिः ॥ कुशः क्रौञ्चस्त-
था शाकः पुष्करद्वीप एव च ॥ ६ ॥ लवणेक्षुसुरासर्पिर्दधिक्षीरजलाब्धिभिः ॥ द्विगुणैर्द्विगुणैर्वृद्ध्या सर्वतः परिवेष्टिताः ॥ ७ ॥ जम्बुद्वी-
पस्य संस्थानं प्रवक्ष्येऽहं निबोध मे ॥ लक्षमेकं योजनानां वृत्तो विस्तारदैर्घ्यतः ॥ ८ ॥ हिमवान्हेमकूटश्च निषधो मेरुरेव च ॥ नीलः
श्वेतस्तथा शृङ्गी सप्त तद्वर्षपर्वताः ॥ ९ ॥ द्विलक्षयोजनायामौ मध्ये तत्र महाचलौ ॥ तयोर्दक्षिणतो यौ तु यौ तथोत्तरतो गिरी ॥१०॥
दशभिर्दशभिर्न्यूनैः सहस्रैस्ते परस्परम् ॥ द्विसाहस्रोच्छ्रयाः सर्वे तावद्विस्तारिणश्च ते ॥ ११ ॥

## Chapter 1 (Adhyāya 51)

1. Kraushtaki said: Dear *brāhmaṇa*, how many islands are there? How many oceans and mountains? Dear sage, how many *varṣas* and rivers are there?

2-3. Kindly narrate to me the magnitude of the five great elements, the details of Lokāloka and the movement of sun and moon.

4. Mārkaṇḍeya said: The entire earth measures 50 crore *yojanas* [500,000,000 *yojanas* or four billion miles]. Listen to the configuration of the earth and other details as I narrate it to you.

5. Listen to the magnitudes of the islands starting from Jambū-dvīpa to Puṣkara-dvīpa which I have narrated to you earlier.

6. The islands Jambū, Plakṣa, Śālmali, Kuśa, Krauncha, Śāka and Puṣkara are respectively two-fold in their width. Plakṣa is twice broader than Jambū, and so on.

7. These islands are encircled by the salt ocean, sugarcane juice ocean, wine ocean, *ghee* ocean, yogurt ocean and milk ocean in the same order, each ocean being twice wider than the island encircled.

8. I will tell you the magnitude of Jambū-dvīpa. It is one lakh *yojanas* [100,000 *yojanas* or 800,000 miles] wide on all sides. It is circular.

9. The seven important mountains of Jambū-dvīpa are Himavān, Hemakūṭa, Niṣadha, Meru, Nīla, Śveta and Śṛṅga.

10-11. Both the mountains in the middle are one 100,000 *yojanas* [800,000 miles] long. The two adjacent mountains are one

समुद्रान्तःप्रविष्टाश्च षडस्मिन्वर्षपर्वताः ॥ दक्षिणोत्तरतो निम्ना मध्ये तुङ्गा यथा क्षितिः ॥ १२ ॥ वेद्यर्द्धे दक्षिणे त्रीणि त्रीणि वर्षाणि
चोत्तरे ॥ इलावृतं तयोर्मध्ये चन्द्रार्द्धाकारवत्स्थितम्॥१३॥ ततः पूर्वेण भद्राश्वं केतुमालं च पश्चिमे ॥ इलावृतस्य मध्ये तु मेरुः कनकप-
र्वतः ॥१४॥ चतुराशीति साहस्रस्तस्योच्छ्रायो महागिरेः ॥ प्रविष्टः षोडशाधस्ताद्विस्तारः षोडशैव तु ॥१५॥ शरावसंस्थितत्वाच्च द्वात्रिं-
शन्मूर्ध्नि विस्तृतः॥ शुक्लः पीतोऽसितो रक्तः प्राच्यादिषु यथाक्रमम् ॥१६॥ विप्रे वैश्यस्तथा शूद्रः क्षत्रियश्च स्ववर्णतः ॥ तस्योपरि तथै-
वाष्टौ पुर्यो दिक्षु यथाक्रमम् ॥१७॥ तस्योपरि सभा दिव्याः पूर्वादिषु क्रमेण तु ॥ इंद्रादिलोकपालानां तन्मध्ये ब्रह्मणः सभा ॥ योजनानां
सहस्राणि चतुर्दश समुच्छ्रिता ॥१८॥ अयुतोच्छ्रायास्तस्याधस्तथा विष्कम्भपर्वतः ॥ प्राच्यादिषु क्रमेणैव मन्दरो गन्धमादनः ॥१९॥
विपुलश्च सुपार्श्वश्च केतुपादपशोभिताः ॥ कदम्बो मन्दरे केतुर्जम्बुर्वै गन्धमादने ॥ २० ॥

tenth shorter. The two extreme south and north mountains are yet one tenth shorter than the adjacent ones. All of them are two thousand *yojanas* wide and equally high.

12. The six mountains in Jambū-dvīpa have entered the ocean on both sides. They are high in the middle and slope downwards the north and south, just like Jambū-dvīpa.

13. Both in the northern and southern hemisphere of the raised Jambū Island, there are three *varṣas* each. Ilāvṛta is in the middle like a half-moon attached to both the hemispheres.

14. Then there is Bhadrāśva to the east and Ketumāla to the west of Ilāvṛta, which occupies the middle. At the centre of Ilāvṛta, there is the golden mountain Meru.

15. It is 84,000 *yojanas* [672,000 miles] above the earth, 16,000 *yojanas* [128,000 miles] have gone into the earth. The width at the bottom is also 16,000 *yojanas* [128,000 miles].

16. It is like a bowl and 32,000 *yojanas* [256,000 miles] wide at the top. It appears white, yellow, black and red from the east, south, west and north respectively.

[Translator's note: "*Sharavasamathitatvat cha*" is the text. It means "because it is like a *sharava*." "*Sharava*" is a bowl or pan. The simile is given to express the circular shape.]

17. By it's color, it is a *brāhmaṇa*, a merchant, a *śūdra* and a *kṣatriya* respectively. There are eight cities on top of the mountain in the order of the directions.

विपुले च तथाश्वत्थः सुपार्श्वे च वटो महान् ॥ एकादशशतायामा योजनानामिमे नगाः ॥ २१ ॥ जठरो देवकूटश्च पूर्वस्यां दिशि-
पर्वतौ ॥ आनीलनिषधायातौ परस्परनिरन्तरौ ॥ २२ ॥ निषधः पारियात्रश्च मेरोः पार्श्वे तु पश्चिमे ॥ यथा पूर्वौ तथा चैतावानीलनिष-
धायतौ ॥ २३॥ कैलासो हिमवांश्चैव दक्षिणेन महाचलौ ॥ पूर्वपश्चायतावेतावर्णवान्तर्व्यवस्थितौ ॥ २४ ॥ शृङ्गवाञ्जारुधिश्चैव तथैवो-
त्तरपर्वतौ ॥ यथैव दक्षिणे तद्वदर्णवान्तर्व्यवस्थितौ ॥ २५ ॥ मर्यादापर्वता ह्येते कथ्यतेऽष्टौ द्विजोत्तम ॥ हिमवद्धेमकूटादिपर्वतानां
परस्परम् ॥ २६ ॥ नवयोजनसाहस्रं प्रागुदग्दक्षिणोत्तरम् ॥ मेरोरिलावृते तद्वदन्तरे वै चतुर्दिशम् ॥ २७ ॥ फलानि यानि वै जम्ब्वा ग-
न्धमादनपर्वते ॥ गजदेहप्रमाणानि पतन्ति गिरिमूर्द्धनि ॥ २८ ॥ तेषां स्रावात्प्रभवति ख्याता जम्बूनदीति वै ॥ यत्र जाम्बूनदं नाम
कनकं सम्प्रजायते ॥२९॥ सा परिक्रम्य वै मेरुं जम्बूमूलं पुनर्नदी ॥ विशति द्विजशार्दूल पीयमाना जनैश्च तैः ॥ ३० ॥

18. There are these eight divine cities of Indra and other Lokapālas starting from the east. Brahmā's abode is situated exactly in the middle of all these eight cities. It is 14,000 *yojanas* [112,000 miles] high.

19. There are four wedge mountains to Meru in the four directions: Mandāra, Gandhamādana, Vipula and Supārśva—each of them is 10,000 *yojanas* [80,000 miles] high.

20-21. There are high trees which resemble flagstaffs on top of all these wedge mountains: Kadamba, Jambū, Ashwatha and Vāta (Banyan) respectively. Each of them is 11,000 *yojanas* [88,000 miles] high.

22. There are two mountains Jaṭhara and Devākūṭa in the east, stretching from Nīla to Niṣadha. They are adjacent to each other leaving no space between them.

23. Niṣadha and Pāriyātra are located to the west of Meru—they also stretch from Nīla to Niṣadha and are placed close to each other like the eastern mountains.

24. Kailāsa and Himavān are the two mountains located to the south of Meru—they stretch from east to west and enter the sea on both sides.

25. Śṛṅgavān and Jārudhi are the two mountains located to the north—they resemble the two southern mountains in all respects.

26. These eight mountains are the border mountains to Himavān, Hema Kūṭa and so on.

27. Ilāvṛta is 9,000 *yojanas* [72,000 miles] from Meru on all sides, east-west and north-south.

भद्राश्वेऽश्वशिरा विष्णुर्भारते कूर्मसंस्थितिः ॥ वराहः केतुमाले च मत्स्यरूपस्तथोत्तरे ॥३१॥ तेषु नक्षत्रविन्यासादृषयः समवस्थिताः ॥
चतुर्ष्वपि द्विजश्रेष्ठ ग्रहाभिभवपाठकाः ॥ ३२ ॥ इति श्रीमार्कण्डेयपुराणे भुवनकोशे जम्बूद्वीपवर्णनं नामैकपंचाशत्तमोऽध्यायः ॥५१॥
मार्कण्डेय उवाच ॥ शैलेषु मन्दराद्येषु चतुर्ष्वपि द्विजोत्तम ॥ वनानि यानि चत्वारि सरांसि च निबोध मे ॥ १ ॥ पूर्वं चैत्ररथं नाम
दक्षिणे नन्दनं वनम् ॥ वैभ्राजं पश्चिमे शैले सावित्रं चोत्तराचले ॥ २ ॥ अरुणोदं सरः पूर्वं मानसं दक्षिणे तथा ॥ शीतोदं पश्चिमे मेरोर्म-
हाभद्रं तथोत्तरे ॥ ३ ॥ शीतार्तश्चक्रमुंजश्च कुलीरोऽथश्च कङ्कवान् ॥ मणिशैलोऽथ वृषवान्महानीली भवाचलः ॥ ४ ॥ सुबिन्दुर्मन्दरो
वेणुस्तामसो निषधस्तथा ॥ देवशैलश्च पूर्वेण मन्दरस्य महाचलः ॥५॥ त्रिकूटः शिखराद्रिश्च कलिङ्गोऽथ पतङ्गकः ॥ रुचकः सानुमां-
श्चाद्रिस्ताम्रकोऽथ विशाखवान् ॥ ६ ॥ श्वेतोदरः समूलश्च वसुधारश्च रत्नवान् ॥ एकशृङ्गो महाशैलो राजशैलः पिपाठकः ॥ ७ ॥
पंचशैलोऽथ कैलासो हिमवांश्चाचलोत्तमः ॥ इत्येते दक्षिणे पार्श्वे मेरोः प्रोक्ता महाचलाः ॥ ८ ॥

28-29. The elephant sized fruits of Jambū tree fall on Gandhamādana Mountain. The juice of these fruits flows in the form of a river Jambūnadī. A special type of gold, Jāmbūnada by name, is produced by this river.

30. The river flows around Meru and again reaches the bottom of the Jambū tree as people drink the juice as it flows.

31. Viṣṇu, in the form of Hayagrīva, stays in Bhadrāśva. In Bhārata, he is in the form of the tortoise. In Ketumāla, he is in the form of a boar and in Uttarā Kuru, he is in the form of a fish.

32. Sages reside in all these four *varṣas*.

[Translator's note:]

teshu nakshatra vinyasad rshayah samavasthitah
chatarshvapi dvijashresta grahabhibhavapathakah)
Nakshatra vinyāsa *means the configuration of stars.*

*Grāha* = planets. *Abhibhava* = defect, *pathaka* = reciting.

## Chapter 2 (Adhyāya 52)

1. Mārkaṇḍeya said: Dear *brāhmaṇa*, listen to the names of parks and lakes that exist on top of the four mountains, Mandāra and others.

2. Caitraratha Park is in the east, Nandana in the south, Vaibhrājaka in the west and Sāvitra on the northern mountain.

3. Aruṇodā lake is in the east, Manasā lake in the south, Sheetoda in the west and Mahābhādra in the north.

मार्कण्डेय उवाच ॥ शैलेषु मन्दराद्येषु चतुर्ष्वपि द्विजोत्तम ॥ वनानि यानि चत्वारि सरांसि च निबोध मे ॥ १ ॥ पूर्वं चैत्ररथं नाम
दक्षिणे नन्दनं वनम् ॥ वैभ्राजं पश्चिमे शैले सावित्रं चोत्तराचले ॥ २ ॥ अरुणोदं सरः पूर्वं मानसं दक्षिणे तथा ॥ शीतोदं पश्चिमे मेरोर्म-
हाभद्रं तथोत्तरे ॥ ३ ॥ शीतार्तश्चक्रमुंजश्च कुलीरोऽश्वश्च कङ्कवान् ॥ मणिशैलोऽथ वृषवान्महानीली भवाचलः ॥ ४ ॥ सुबिन्दुर्मन्दरो
वेणुस्तामसो निषधस्तथा ॥ देवशैलश्च पूर्वेण मन्दरस्य महाचलः ॥५॥ त्रिकूटः शिखराद्रिश्च कलिङ्गोऽथ पतङ्गकः ॥ रुचकः सानुमां-
श्चाद्रिस्ताम्रकोऽथ विशाखवान् ॥ ६ ॥ श्वेतोदरः समूलश्च वसुधारश्च रत्नवान् ॥ एकशृङ्गो महाशैलो राजशैलः पिपाठकः ॥ ७ ॥
पंचशैलोऽथ कैलासो हिमवांश्चाचलोत्तमः ॥ इत्येते दक्षिणे पार्श्वे मेरोः प्रोक्ता महाचलाः ॥ ८ ॥

4-5. The mountains situated to the east of Mandara Mountain are Sheetarta, Chakramunja, Kulira, Ashva, Kangavan, Manishaila, Vrshabha, Mahanili, Bhava, Subindu, Mandara, Venu, Tamasa, Nishada and Devashaila.

6-8. The mountains situated in the south of Meru are Trikūṭak, Shikaradri, Kaliṅga, Pataṅga, Rucaka, Sanuman, Tamraka, Vishakhavan, Shvetodara, Samūla, Vasudhārā, Ratnavan, Ekasrnga, Mahashaila, Rajashaila, Pipataka, Panchashaila, Kailāsa and Himavān.

9-10. Suraksha, Śiśiraksha, Vaidūrya, Piṅgalā, Pinjara, Mahabhadra, Surasā, Kapila, Madhu, Añjanā, Kukkuṭa, Kṛṣṇa, Pandura, Sahasrashikara, Pāriyātra and Śṛṅgavān. These mountains are to the west of Meru. They are situated beyond the western wedge mountain.

11-13. Listen to the names of the mountains which lie to the north of Meru: Śaṅkha, Ṛṣabha, Haṁsa, Kapilendra, Sanuman, Nīla, S*varṇas*rnga, Shatashrnga, Pushpaka, Megha, Virahaksha, Varāha, Mayūra and Jārudhi.

14-15. These are the mountains which lie to the north of Meru. The valleys of these mountains are very beautiful with their forests and lakes of pure water. Virtuous human beings are born there after their death.

16. These are called heavens on earth and they excel even heaven. There is no earning of fresh *papa* [sinful reactions] or *puṇyā* [pious reactions] in these places.

17. There is only enjoyment which is a result of *puṇyā*. Consequently the *puṇyā* gets reduced in these mountains Sheetanta and others.

18. Here, there are beautiful abodes of Vidyādharas, Yakṣas, Kinnaras, serpents, Rakṣas and even demigods.

सुरक्षः शिशिराक्षश्च वैदूर्यः पिङ्गलस्तथा ॥ पिंजरोऽथ महाभद्रः सुरसः कपिलो मधुः ॥ ९ ॥ अञ्जनः कुक्कुटः कृष्णः पाण्डुरश्चाचलो
त्तमः ॥ सहस्रशिखरश्चाद्रिः पारियात्रः सश‍ृङ्गवान् ॥ १० ॥ पश्चिमेन तथा मेरोर्विष्कम्भात्पश्चिमाद्बहिः ॥ एतेऽचलाः समाख्याताः
श‍ृणुष्वान्यांस्तथोत्तरान् ॥ ११ ॥ शङ्खकूटोऽथ वृषभो हंसनाभस्तथाचलः ॥ कपिलेन्द्रस्तथा शैलः सानुमान्नील एव च ॥ १२ ॥
स्वर्णश‍ृङ्गः शातश‍ृङ्गः पुष्पको मेघपर्वतः ॥ विरजाक्षो वराहाद्रिर्मयूरो जारुधिस्तथा ॥ १३ ॥ इत्येते कथिता ब्रह्मन्मेरोरुत्तरतो नगाः ॥
एतेषां पर्वतानां तु द्रोण्योऽतीव मनोहराः ॥ १४ ॥ वनैरमलपानीयैः सरोभिरुपशोभिताः ॥ तासु पुण्यकृतां जन्म मनुष्याणां द्विजो-
त्तम ॥ १५ ॥ एते भौमा द्विजश्रेष्ठ स्वर्गाः स्वर्गगुणाधिकाः ॥ न तासु पुण्यपापानामपूर्वाणामुपार्जनम् ॥१६॥ पुण्योपभोग एवोक्तो देवा-
नामपि तास्वपि ॥ शीतान्ताद्येषु चैतेषु शैलेषु द्विजसत्तम ॥ १७ ॥ विद्याधराणां यक्षाणां किन्नरोरगरक्षसाम् ॥ देवानां च महावासा
गन्धर्वाणां च शोभनाः ॥ १८ ॥

19. There are beautiful cities with auditoriums, parks, lakes and the wind is pleasant in all the seasons. There is no fatigue, no enmity and no ill-will in these places.

20. This is the four-petalled lotus, I have mentioned to you. Bhadrāśva, Bhārata, Ketumāla and Kuruvarṣa are the petals.

21. The Bhārata-varṣa which I have narrated to you lies to the extreme south of Meru. It is the only *karma-bhūmi*. People earn *puṇyā* and *papa* only here and nowhere else.

22. This is the most important one. There is everything here. From here one can go to Svarga, *mokṣa* [liberation], the same earth and even hell. He can be born as a creature. Whatever a human being achieves, is from here.

## Chapter 3 (Adhyāya 53)

1. Mārkaṇḍeya said: The place of Nārāyaṇa, the creator, is near Dhruvā. Gaṅgā who flows in the three worlds originates from that place.

2. As she came down, she entered the moon and coming into contact with the sun's rays falling there, she became most sanctifying.

3. Then, she fell on top of Meru, split into four streams, and falling down from the edges of Meru, flowed in different directions.

4. Falling without any support, her waters spread widely and reached the Mandāra and other mountains simultaneously.

5. She fell on the four mountains with her waters, splitting the rocks there. The eastern stream is called Sītā and she enters the Citraratha Park.

सभा पुर्यो मनोज्ञाश्च सदैवोपवनैर्युताः ॥ सरांसि च मनोज्ञानि सर्वर्तुसुखदोऽनिलः ॥ १९ ॥ न चैतेषु क्लमो बाधा वैमनस्यं च कुत्र-
चित् ॥ तदेतत्पार्थिवं पद्मं चतुष्पत्रं मयोदितम् ॥ २० ॥ भद्राश्वभारतादीनि पत्राण्यस्य चतुर्दिशम् ॥ भारतं नाम यद्वर्षं दक्षिणेन मयो-
दितम् ॥ २१ ॥ तत्कर्मभूमिर्नान्यत्र संप्राप्तिः पुण्यपापयोः ॥ एतत्प्रधानं विज्ञेयं यत्र सर्वं प्रतिष्ठितम् ॥ २२ ॥ अस्मात्स्वर्गापवर्गौ च
मानुष्यनारकावपि ॥ तिर्यक्त्वमथवाप्यन्यन्नरः प्राप्नोति वै द्विज ॥ २३ ॥ इति श्रीमार्कण्डेयपुराणे भुवनकोशे जम्बूद्वीपांतर्गतखण्ड-
वर्णनं नाम द्विपंचाशत्तमोऽध्यायः ॥५२॥ मार्कण्डेय उवाच ॥ धराधारं जगद्योनेः पदं नारायणस्य च ॥ ततः प्रवृत्ता या देवी गङ्गा त्रिप-
थगामिनी ॥ १ ॥ सा प्रविश्य सुधायोनिं सोममाधारमम्भसाम् ॥ ततः संवर्द्धमानार्करश्मिसङ्गतिपावनी ॥ २ ॥ पपात मेरुपृष्ठे च सा
चतुर्द्धा ततो ययौ ॥ मेरुकूटतटान्तेभ्यो निपतन्ती विवर्तिता ॥ ३ ॥

6. She drenched the park and went to the lake Varuṇodā. From there, she went to the Sheetanta Mountain first and then to other mountains gradually.

7. She then came down on the earth and reached the ocean flowing through Bhadrāśva.

8-9. Alakanandā is the southern stream. She fell on top of Gandhamādana, drenched the Nandana Park and reached the Manasā lake. From there, flowing with great speed, she reached the mountains Ramyā, Trishikhara and gradually all the other mountains in the south.

10. Drenching all these mountains, she reached Himalaya where Śiva held her on his head and did not let her go.

11. Pleased by the severe penance of Bhagīratha, Śiva finally let her go. She then split into seven streams and reached the southern ocean.

12. While three streams flowed to the east, she followed Bhagīratha by her fourth stream which flowed to the south.

13-15. The stream which fell from Meru in the west is called Suchakshu. She fell on the wedge mountain Vipula, drenched the park Vaibhraja and then reached the lake Sheetoda. Then she gradually fell on all the mountains, reached the mountain Trishikha and from there reached Ketumāla-varṣa and finally reached the western ocean.

16-18. In the north of Meru, she reached the mountains Ṛṣabha and others gradually. She reached the wedge mountain Supārśva. Bhadrasoma, as she is called in the fourth stream, she reached the Savitṛ park and from there the Mahābhadra lake. She then reached the mountain Śaṅkha Kūṭa and other mountains and flowing through Uttarā Kuru reached the northern ocean.

विकीर्यमाणसलिला निरालम्बा पपात सा ॥ मन्दराद्येषु पादेषु प्रविभक्तोदका समम् ॥ ४ ॥ चतुर्ष्वपि पपाताम्बुविभिन्नाद्रिशिलो-
च्चया ॥ पूर्वा सीतेति विख्याता ययौ चैत्ररथं वनम् ॥ ५ ॥ तत्प्लावयित्वा च ययौ वरुणोदं सरोवरम् ॥ शीतान्तं च गिरिं तस्मात्तत-
श्चान्यान्गिरीन्क्रमात् ॥ ६ ॥ गत्वा भुवं समासाद्य भद्राश्वे जलधिं गता ॥ तथैवालकनन्दाख्या दक्षिणे गन्धमादने ॥ ७ ॥ मेरुपादे वनं
गत्वा नन्दनं देवनन्दनम् ॥ मानसं च महावेगात्प्लावयित्वा सरोवरम् ॥ ८ ॥ आसाद्य शैलराजानं रम्यं त्रिशिखरं गता ॥ तस्माच्च पर्व-
तान्सर्वान्दक्षिणे ये क्रमोदिताः ॥ ९ ॥ तान्प्लावयित्वा संप्राप्ता हिमवन्तं महागिरिम् ॥ दधार तत्र तां शम्भुर्न मुमोच वृषध्वजः ॥ १० ॥
भगीरथेनोपवासैः स्तुत्या चाराधितो विभुः ॥ तत्र मुक्ता च शर्वेण सप्तधा दक्षिणोदधिम् ॥ ११ ॥ प्रविवेश त्रिधा प्राच्यां प्लावयन्ती
महानदी ॥ भगीरथरथस्यानु स्रोतसैकेन दक्षिणाम् ॥ १२ ॥

19. I have correctly narrated to you the Gaṅgā in detail and also the configuration of Jambū-dvīpa.

20. People living in Kimpuruṣa and other varṣas are very happy and free from troubles—and are always the same without any decrease or increase.

21. In all nine varṣas, there are seven important mountains and rivers originating from these mountains.

22. The waters in the eight varṣas, Kimpuruṣa and others come only from springs. Rain water appears only in Bhārata-varṣa.

23. The eight *varṣas* are full of trees growing from these waters. The people living there are highly accomplished mentally. Their austerities also bring them accomplishment. The trees there also bestow *siddhis* [mystic perfections] upon those who live under their shade.

24. The *siddhis* obtained are of two kinds: Svābhāvikī and Deshya. The *siddhis* bestowed by desire trees are called Svābhāvikī, whereas the *siddhis* bestowed by the place itself are called Deshya.

25. The divine and subtle waters there bestow the *siddhi* called Manasi. The *siddhi* obtained from worship and other practices in called *karmajā*.

26. There is no difference in the four *yugas* here. There are no physical or mental diseases. There are no deeds which beget *puṇyā* or *papa* (virtue or sin).

## Chapter 4 (Adhyāya 54)

1-4. Kraushtaki said: Sir, I have listened to what you have narrated, the details of Jambū-dvīpa and other things. You said that

तथैव पश्चिमे पादे विपुले सा महानदी ॥ सुचक्षुरिति विख्याता वैभ्राजं सा वनं ययौ ॥१३॥ शीतोदं च सरस्तस्मात्प्लावयन्ती महानदी ॥
तस्मात्क्रमेण चाद्रीणां शिखरेषु निपत्य सा ॥ सुचक्षुः पर्वतं प्राप्ता ततश्च त्रिशिखं गता ॥ १४ ॥ केतुमालं समासाद्य प्रविष्टा दक्षिणो-
दधिम् ॥१५॥ ( गत्योत्तरां दिशं गंगा दिव्या सा च महानदी ॥ तस्माच्च ऋषभादींश्च क्रमादुत्तरजान्नगान् ॥ ) सुपार्श्वं तु तथैवाद्रिं मेरुपादं
द्विसा गता ॥ भद्रसोमेति विख्याता सा ययौ सवितुर्वनम् ॥१६॥ तत्प्लावयन्ती संप्राप्ता महाभद्रं सरोवरम् ॥ ततश्च शङ्खकूटं सा प्रयाता
वै महानदी ॥१७॥ तस्माच्च वृषभादीन्सा क्रमात्प्राप्य शिलोच्चयान् ॥ महार्णवमनुप्राप्ता प्लावयित्वोत्तरान्कुरून् ॥१८॥ एवमेषा मया गङ्गा
कथिता ते द्विजर्षभ ॥ जम्बूद्वीपनिवेशाश्च वर्षाणि च यथातथम् ॥१९॥ वसन्ति तेषु सर्वेषु प्रजाः किंपुरुषादिषु ॥ सुखप्राया निरातङ्का
न्यूनतोत्कर्षवर्जिताः ॥ २० ॥ नवस्वपि च वर्षेषु सप्त सप्त कुलाचलाः ॥ एकैकस्मिंस्तथा देशे नद्यश्चाद्रिविनिःसृताः ॥ २१ ॥

*karma* brings *puṇyā* and *papa* only here and nowhere else. "Here" means Bharāta-varṣa. Only in Bharāta-varṣa one can attain heaven, *mokṣa*, hell, birth here again, and so on. And *karma* is not enjoined anywhere else other than Bharāta-varṣa. I would like to know this in detail, so kindly narrate Bharāta-varṣa in detail, i.e. the divisions of this *varṣa*, the mountains, rivers and all.

5. Mārkaṇḍeya said: There are nine divisions in Bharāta-varṣa—all of them are separated by the ocean and are mutually inaccessible.

6. They are Indradvīpa, Kaśeru, Tāmraparṇa, Gabhastimān, Nāgadvīpa, Saumya, Gandharva, and Varuṇa.

7. This (Bharāta-varṣa) is the ninth island, surrounded by water and measuring a thousand *yojanas* [eight thousand miles] from south to north.

8. Worship, studies and trade are the activities here which cause people to interact with one another.

9. One can attain Svarga [heaven] and *mokṣa* [liberation] from here. There is the reckoning of *puṇyā* [virtue] and *pāpa* [vice] also.

10. The seven important mountains here are Mahendra, Malaya, Sahya, Śuktimān, Ṛkṣagiri, Vindhya and Pāriyātra. There are thousands of other mountains near these important mountains.

11-14. They are very high, broad and beautiful: Kolāhala, Vaibhraja, Mandāra, Dardura, Vātasvana, Vaidyutā, Maināka, Svarasa, Tungaprastha, Nāga, Rochana, Pandma, Pushpa, Darjayanta, Raivata, Arbuda, Rshyamuka, Gomanta, Kutashaila, Kṛtasmara, Shrishaila, Chakara and undreds of other mountains.

15. The people living here are a mixture of both *mlecchas* and *aryas*. They predominate in certain parts.

16-29. They drink the waters of the great rivers Gaṅgā, Saraswati, Sindhu, Candrabhaga, Yamunā, Shatadru, Vitastā, Irāvatī,

यानि किंपुरुषाद्यानि वर्षाण्यष्टौ द्विजोत्तम ॥ तेषूद्भिज्जानि तोयानि नैवं वार्यत्र भारते ॥ २२ ॥ वार्क्षी स्वाभाविकी देश्या तोयोत्था मानसी तथा ॥ कर्मजा च नृणां सिद्धिर्वर्षेष्वेतेषु चाष्टसु ॥ २३ ॥ कामप्रदेभ्यो वृक्षेभ्यो वार्क्षी सिद्धिः स्वभावजा ॥ स्वाभाविकी समाख्याता तृप्तिर्देश्या च दैशिकी ॥ २४ ॥ अपां सौक्ष्म्याच्च तोयोत्थाद्ध्यानोपेताच्च मानसी ॥ उपासनादिकार्यात्तु कर्मजा साध्युदाहृता ॥२५॥ न चैतेषु युगावस्था नाधयो व्याधयो न च ॥ पुण्यापुण्यसमारम्भा नैव तेषु द्विजोत्तम ॥ २६ ॥ इति श्रीमार्कण्डेयपुराणे गंगावतरणवर्णनं नाम त्रिपंचाशत्तमोऽध्यायः ॥ ५३ ॥ क्रौष्टुकिरुवाच ॥ भगवन्कथितं त्वेतज्जम्बूद्वीपं समासतः ॥ यदेतद्भवता प्रोक्तं कर्म नान्यत्र पुण्यदम् ॥ १ ॥ पापाय वा महाभाग वर्जयित्वा तु भारतम् ॥ इतः स्वर्गश्च मोक्षश्च मध्यश्चान्तश्च गम्यते ॥ २ ॥ न खल्वन्यत्र मर्त्यानां भूमौ कर्म विधीयते ॥ तस्माद्विस्तरशो ब्रह्मन्ममतद्भारतं वद ॥ ३ ॥

Kuhū, Gomatī, Dhūtapāpā, Bahuda, Drshadvati, Vipāśā, Devīka, Rankshu, Nischira, Gaṇḍakī, Kaushaki. As well as of rivers originating from the foot of Himalaya: Vedasmṛti, Vedavatī, Vrtraghni, Sindhūra, Venna, Sanandana, Sadanira, Mahī, Parā, Charmanvati, Nupi, Vidisha, Vetravatī, Kshipra, Avantī. And rivers originating from the mountain Pāriyātra: Shona, Mahanada, Narmadā, Suratha, Adrija, Mandākinī, Dasharna, Chitrakuta, Chitrotpala, Tāmasa, Karamoda, Pishacika, Pippalashroni, Vanjula, Sumeruja, Shuktimati, Sakuli, Tridiva, Kramu. And rivers originating from the foot of the mountain Rksha: Kshipra, Payosvi, Nirvindhyā, Tāpī, Nishadavati, Veṇyā, Vaitarini, Sinivati, Kumudvati, Karatoya, Mahagowri, Durgā, AntahŚiva And the rivers originating from the foot of the Vindhya Mountain: Godāvarī, Bhīmarathī, Kṛṣṇa, Veṇyā, Tuṅgabhadrā, Suprayoga, Vāhya, Kāverī, originating from the foot of Sahya Mountain, Langulini and VamŚākara originating from the Mahendra mountain. And the rivers originating from Śuktimān: i.e. Rshikalya, Kumārī, Mandaga, Mandavahini, Kuśa and Palashini.

30. All these are verily Gaṅgā and are very sanctifying. They reach the ocean.

31. They are the mothers of the world. They remove all sins and there are other small rivers in thousands.

32. Some flow only during the rainy season—others are perennial.

33. The regions that are situated at the middle part of this Varṣa are Matsyas, Ashvakatas, Kulyāś, Kuntalas, Kashikoshalas, Arbudas, Arkaliṅgas, Malakas and Vṛkas.

34. The region to the north of Sahya mountains where Godāvarī flows is the most beautiful place here.

35-41. There is the beautiful city Govardhana belonging to Bhārgava there. The people who live there are the Bāhlīkas, Vatadhanas, Gāndhāras, Yavanas, Sindhusauviras, Yavanas, Madrakas, people living on the banks of the river Shatadru,

ये चास्य भेदा यावन्तो यथावत्स्थितिरेव च ॥ वर्षोऽयं द्विजशार्दूल ये चास्मिन्देशपर्वताः ॥ ४ ॥ मार्कण्डेय उवाच ॥ भारतस्यास्य
वर्षस्य नव भेदान्निबोध मे ॥ समुद्रान्तरिता ज्ञेयास्ते त्वगम्या परस्परम् ॥ ५ ॥ इन्द्रद्वीपः कशेरुमांस्ताम्रवर्णो गभस्तिमान् ॥ नागद्वी-
पस्तथा सौम्यो गान्धर्वो वारुणस्तथा ॥ ६ ॥ अयं तु नवमस्तेषां द्वीपः सागरसंवृतः ॥ योजनानां सहस्रं वै द्वीपोऽयं दक्षिणोत्तरम् ॥७॥
पूर्वे किराता यस्यान्ते पश्चिमे यवनास्तथा ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चान्तःस्थिता द्विज ॥ ८ ॥ इज्याध्यायवणिज्याद्यैः कर्मभिः
कृतपावनाः ॥ तेषां संव्यवहारश्च एभिः कर्मभिरिष्यते ॥९॥ स्वर्गापवर्गप्राप्तिश्च पुण्यं पापं च वै तदा ॥ महेन्द्रो मलयः सह्यः शुक्तिमानृक्ष-
पर्वतः ॥ १० ॥ विन्ध्यश्च पारियात्रश्च सप्तैवात्र कुलाचलाः ॥ तेषां सहस्रशश्चान्ये भूधरा ये समीपगाः ॥ ११ ॥ विस्तारोच्छ्रयिणो
रम्या विपुलाश्चित्रसानवः ॥ कोलाहलः स वैभ्राजो मन्दरो दर्दुराचलः ॥ १२ ॥ वातस्वनो वैद्युतश्च मैनाकः स्वरसस्तथा ॥ तुङ्गप्रस्थो
नागगिरी रोचनः पाण्डुराचलः ॥ १३ ॥

Kaliṅgas, Panadas, Harabhushikas, Matharas, Bahubhadras, Kaikeyas, Dashamalikas, relatives of Kṣatriyas, Vaiśyās, and śūdrās, Kāmbojas, Daradas, Barbaras, Aṅgas, Laukikas, Chinas, Tusharas, Pahlavas, Atreyas, Bhradwajas, Pushkalas, people who show their belly, Kasherukas, Lampakas, Shulakaras, Chalikas, Jagudas, Aapadhas, Animadras, many types of Kirātas, Tāmasāś, Hamsamargas, Kashmiras, Shulikas, Kuhakas, Urnas and Darvas.

42. These are the regions of the north. Listen to the regions of the east as I narrate it to you.

43-44. They are Abhrarakas, Mudgarakas, Antargiris, Bahirgiras, Plavangas, Rangeyas, Maladas, Malavartikas, Brahmottaras, Pravijayas, Bhārgavas, Geyamallakas, Pragjyotishas, Madras, Videhas, Tamraliptakas, Mallas, Māgadhas and Gomedas. These are the regions in the east.

45-48. The regions in the south are Pāṇḍyas, Keralas, Cholas, Kuntyas, Shailupas, Mushikas, Kumāras, Vanavasakas, Maharashtras, Mahishikas, Kaliṅgas, Ābhīras, Vaishikyas, Aatavyas, Shabaras, Pulindas, Vindhyas, Maleyas, Vidarbhas, Dandakas, Paurikas, Maulikas, Ashamakas, Bhogavardhanas, Naishikas, Kuntalas, Āndhras, Udbhidas, Vanadarakas. These are the regions in the south. Listen to the regions in the west as I narrate it to you.

49-52. They are Sūryarakas, Kalibalas, Durgās, Katas, Pulindas, Suminas, Rupapas, Svapadas, Kuruminas, Kathaksharas, Tosalas, Kosalās, Traipuras, Vidishas, Nasikyavas, the regions to the north of Narmadā, Bhirukacchas, Maheyas, Sārasvatas, Kashmiras, Surashtras, Aavantayas, and Arbudas. These are the regions in the west.

53-55. Listen to the people who live around Vindhya mountain. They are Sarajas, Karushas, Keralas, Utkalas, Utttamarhas, Dasharnas, Bhojyas, Kishkindhakas, Tumbaras, Tumbalas, Naishadhas, Annajas, Tushikaras, Virahotras and Avantis: these are the people who live at the foot of the Vindhya mountain.

पुष्पो गिरिर्दुर्जयन्तो रैवतोऽर्बुद एव च ॥ ऋष्यमूकः सगोमन्तः कूटशैलः कृतस्मरः ॥१४॥ श्रीपर्वतश्चकोरश्च शतशोऽन्ये च पर्वताः ॥
तैर्विमिश्रा जनपदा म्लेच्छाश्चार्याश्च भागशः ॥ १५ ॥ तैः पीयन्ते सरिच्छ्रेष्ठा यास्ताः सम्यङ् निबोध मे ॥ गङ्गा सरस्वती सिन्धुश्चन्द्र-
भागा तथाऽपरा ॥१६॥ यमुना च शतद्रुश्च वितस्तैरावती कुहूः ॥ गोमती धूतपापा च बाहुदा च दृषद्वती ॥१७॥ विपाशा देविका रंक्षु-
निश्चीरा गण्डकी तथा ॥ कौशिकी चापगा विप्र हिमवत्पादनिःसृताः ॥ १८ ॥ वेदस्मृतिर्वेदवती वृत्रघ्नी सिन्धुरेव च ॥ वेणा सानन्दना
चैव सदानीरा मही तथा ॥ १९ ॥ पारा चर्मण्वती नूपी विदिशा वेत्रवत्यपि ॥ क्षिप्रा ह्यवन्ती च तथा पारियात्राश्रयाः स्मृताः ॥ २० ॥
शोणो महानदश्चैव नर्मदा सुरसाद्रिजा ॥ मन्दाकिनी दशार्णा च चित्रकूटा तथापरा ॥२१॥ चित्रोत्पला सतमसा करमोदा पिशाचिका ॥
तथान्या पिप्पलश्रोणिर्विपाशा वञ्जुला नदी ॥ २२ ॥

56-59. I will narrate to you the regions of the mountains and the people who live there. They are Niharas, Haṁsa-mārgas, Kurus, Gurganas, Svasas, Kuntapravaranas, Uranas, Darvas, Krtrakas, Trigartas, Galvas, Kirātas, and Tāmasāś. The four yugas Kṛta, Tretā, Dvāpara and Kali are operative here. This is the Bharāta-varṣa found in four directions. The ocean is to the east, south and west here; and in the north there is the Himalaya Mountain: This mountain resembles the string of a bow.

60-61. This Bharāta-varṣa can bestow everything—the position of the creator (Brahmā), the position of a leader among the demigods, demigodhood, human birth, birth as birds, animals, creatures, trees and serpents as well as everything else according to the *puṇyā* and *pāpa* earned here.

62. This is called the *karma-bhūmi*. It is nowhere else. Even the demigods cherish Bharāta-varṣa in their minds.

63. "We will get rid of this demigod position and take birth as human beings in Bharāta-varṣa. A human being does what a demigod cannot do.

64. We are bound by the fetters of *karma* and we are boastful of our deeds. We have a bit of a pleasure here and so do not achieve anything." (This is what the demigods feel).

## Chapter 5 (Adhyāya 55)

1-3. Kraustaki said: Sir, I have listened to the description of Bharāta-varṣa in detail: the divisions, the mountains, rivers, peoples and all. But you said Hari resides in Bharāta-varṣa in his Kūrma (tortoise form). I want to know more about that. Where is his head and where are the legs placed? Narrate to me in detail.

4. Mārkaṇḍeya said: Kūrma occupies the entire Bharāta-varṣa with its nine divisions. His head faces the east.

सुमेरुजा शुक्तिमती सकुली त्रिदिवाक्रमुः ॥ ऋक्षपादप्रसूता वै तथान्या वेगवाहिनी ॥ २३ ॥ क्षिप्रा पयोष्णी निर्विन्ध्या तापी च निषधावती ॥ वेण्या वैतरणी चैव सिनीवाली कुमुद्वती ॥ २४ ॥ करतोया महागौरी दुर्गा चान्तःशिवा तथा ॥ विन्ध्यपादप्रसूतास्ता नद्यः पुण्यजलाः शुभाः ॥ २५ ॥ गोदावरी भीमरथी कृष्णा वेण्या तथापरा ॥ तुङ्गभद्रा सुप्रयोगा वाह्या कावेर्यथापगा ॥ २६ ॥ सह्यपादविनिष्क्रान्ता इत्येताः सरिदुत्तमाः ॥ कृतमाला ताम्रपर्णी पुष्पजा सूत्पलावती ॥ २७ ॥ मलयाद्रिसमुद्भूता नद्यः शीतजलास्त्विमाः ॥ पितृसोमर्षिकुल्या च इक्षुका त्रिदिवा च या ॥ २८ ॥ लांगूलिनी वंशकरा महेन्द्रप्रभवाः स्मृताः ॥ ऋषिकुल्या कुमारी च मंदगा मन्दवाहिनी ॥२९॥ कुशा पलाशिनी चैव शुक्तिमत्प्रभवाः स्मृताः ॥ सर्वाः पुण्याः सरस्वत्यः सर्वा गङ्गाः समुद्रगाः ॥३० ॥ विश्वस्य मातरः सर्वाः सर्वपापहराः स्मृताः ॥ अन्याः सहस्रशश्चोक्ताः क्षुद्रनद्यो द्विजोत्तम ॥ ३१ ॥

5. All the stars and other things occupy the different divisions of his nine fold divisioned body.

6-9. These are the regions and peoples which correspond to the middle part of the Kūrma's body. They are Vedī, Madra, Arimandavya, Shalva, Nīpa, Śāka, Ujjihana, Ghoshasankhya, Śvāsa, Sārasvatā, Matsya, Shenasena, Mathina, Dharmaranya, Jyotishika, Gauragriva, Gudashmaka, Vaidehaka, Panchala, Śaṅketa, Kaṅka, Māruta, Kalakote, Pākhaṇḍa, the denizens of the mountain Pāriyātra, Kapiñjala,Kurubahya, Udumbara and Gajahva.

10. The stars Kṛittikā, Rohiṇī and Mrgashira indicate the good and bad of those who dwell in the middle part.

11-14. These are the regions and people who correspond to the head of Kūrma. They are Vrshadhwaja, Añjanā, Jambū, Mahavachala, Shurpakarna, Vyaghramukha, Murvana, Karvatasana, Chandreshwara, Khasha, Māgadha, Shini, Maithilā, Shubra, Vadanadantura, Pragjyotisha, Lohitya, Samudraka, Puruṣadaka, Purnotkata, Bhadragaura, Udayachala, Kashya, Mekhalā, Mushta, Tāmralipta, Ekapadapa, Vardhamāna and Kosala.

15. The stars Aridra, Punarvasu and Pushya indicate the good and bad of those who reside in these places, according to their *karma*.

16-18. These are the regions and peoples who occupy the right forefoot of Kūrma, the foot placed in the south-east: Kaliṅga, Vaṅga, Jāṭhara, Koshala, Mushika, Chedi, Urdhavakarna, Matsya, Āndhra, Vindhya region and denizens, Vidarbha, Nārikela, Dharmadvipa, Ailika, Vyaghragriva, Mahagriva, traipura, Shmashrudhari, Kiṣkindhā, Hemakūṭa, Niṣadha, Katukasthala, Dasharna, Harika, Nagna, Kakatalaka, parna and shabara.

19. The stars Ashlesha, Māgha and Pūrvaphalgunī occupy the right forefoot of Kūrma. They indicate the good and bad of those who reside in these regions.

प्रावृट्कालवहाः काश्चित्सर्वकालवहाश्च याः ॥ मत्स्याश्वकूटाः कुल्याश्च कुन्तलाः काशिकोशलाः ॥ ३२ ॥ अर्बुदाश्चार्ककलिंगाश्च मल-
काश्च वृकैः सह ॥ मध्यदेश्या जनपदा प्रायशोऽमी प्रकीर्तिताः ॥ ३३ ॥ सह्यस्य चोत्तरे यास्तु यत्र गोदावरी नदी ॥ पृथिव्यामपि
कृत्स्नायां स प्रदेशो मनोरमः ॥ ३४ ॥ गोवर्द्धनपुरं रम्यं भार्गवस्य महात्मनः ॥ वाह्लीका वाटधानाश्च आभीरा कालतोयकाः ॥ ३५ ॥
अपरान्ताश्च शूद्राश्च पह्लवाश्चर्मखण्डिकाः ॥ गान्धारा यवनाश्चैव सिन्धुसौवीरमद्रकाः ॥३६॥ शतद्रुजाः कलिङ्गाश्च पारदा हारभूषिकाः ॥
माठरा बहुभद्राश्च कैकेया दशमालिकाः ॥ ३७ ॥ क्षत्रियोपनिवेशाश्च वैश्यशूद्रकुलानि च ॥ काम्बोजा दरदाश्चैव बर्बरा अंगलौ-
किकाः ॥ ३८ ॥ चीनाश्चैव तुषाराश्च पह्लवा बाह्यतोदराः ॥ आत्रेयाश्च भरद्वाजाः पुष्कलाश्च कशेरुकाः ॥ ३९ ॥ लम्पाकाः शूलका-
राश्च चुलिका जागुडैः सह ॥ औपधाश्चानिभद्राश्च किरातानां च जातयः ॥ ४० ॥ तामसा हंसमार्गाश्च काश्मीरास्तु गणास्तथा ॥
शूलिकाः कुहकाश्चैव च ऊर्णा दार्वास्तथैव च ॥ ४१ ॥

20-28. The regions and peoples who occupy the right side of the Kūrma's central body are as follows: they are Laṅkā, Kalajinas, Shailikas, Nikatas, Mahendras, Malayas, Darduras, people of the hilly regions, Bhṛgukaccha, Konkana, Ābhīras, people residing on the banks of Veṇyā, Avantis, Dashapuras, Akaris, Maharashtras, Karnataks, Gonardas, Chitrakutas, Cholas, Kolagiris, Krauncha Island dwellers, Jatadharas, Kāverī denizens, Rshyamuka-dwellers, Śaṅkha shukti and Vaidūrya mountain dwellers, Varicharas, Kolas, Charmapattas, people residing in Sūryadri and Kumudadra, the outcasts living in the black island, Raudrasvanas, Pishikas, Karmanayakas, south Kaurushas, Rshikas, Tapasaś, Rshabhas, Siṁhalas, Kanchi-dwellers, Trilingas, those who live in the caves of Kuñjara Mountain and Tamaraparnis.

29. The stars Uttaraphalgunī, Hasta and Chitra reside there and indicate the good and bad of those who live in the corresponding regions mentioned above.

30-32. These are the regions and people who reside in the right hind foot of Kūrma which points to the southwest direction. They are the Kāmbojas, Pahlavas, Vadavamukhas, Sindhuś, Sauviras, Aanarthas, Vanithamukhas, Dravanas, Sargigas, Suchas, karṇaś, Pratheyas, Barbaras, Kirātas, Pāradas, Pāṇḍyas, Parashavas, Kālaś, Dhurtakas, Haimagirikas, Kalakas, vairatas, Saurashtras, Daradas, Draviḍas and Maharnavas.

33. The stars Svātī, Viśāka and Anurādhā which occupy this part of Kūrma's body indicate the good and bad of those who reside there.

34-37. These are the regions and people who occupy the tail of Kūrma. They are Manimeghas, Kshuradris, Khanjas, Astragiris, Aparanatikas, Nohayas, Shantikas, Viprashastakas, Konkanas, Panchanadas, Vāmanaś, Avanas, Tarakshuras, Angatakas,

02_MarkandeyaDG-BApril12.pmd 189 5/3/2007, 3:36 PM

एते देशा ह्युदीच्यास्तु प्राच्यान्देशान्निबोध मे ॥ अन्धारका मुद्गरका अन्तर्गिरिबहिर्गिराः ॥४२॥ तथा प्लवङ्गा रङ्गेया माल्दामल्लवर्त्तिकाः ॥
ब्रह्मोत्तराः प्रविजया भार्गवा गेयमल्लकाः ॥ ४३ ॥ प्राग्ज्योतिषाश्च मद्राश्च विदेहास्ताम्रलिप्तकाः ॥ मल्ला मगधगोमेदा प्राच्या जनपदाः
स्मृताः ॥ ४४ ॥ अथापरे जनपदा दक्षिणापथवासिनः ॥ पांड्याश्च केरलाश्चैव चोलाः कुल्यास्तथैव च ॥ ४५ ॥ शैलूषा मूषि-
काश्चैव कुमारा वनवासकाः ॥ महाराष्ट्रा माहिषिकाः कलिङ्गाश्चैव सर्वशः ॥ ४६ ॥ आभीराः सह वैशिक्या आटव्याः शबराश्च ये ॥
पुलिन्दा विन्ध्यमालेया वैदर्भा दण्डकैः सह ॥ ४७ ॥ पौरिका मौलिकाश्चैव अश्मका भोगवर्द्धनाः ॥ नैषिकाः कुन्तला आन्ध्रा उद्भिदा
वनदारकाः ॥ ४८ ॥ दाक्षिणात्यास्त्वमी देशा अपरांस्तान्निबोध मे ॥ सूर्यारकाः कालिवना दुर्गाश्चामी कटैः सह ॥ ४९ ॥ पुलिन्दाश्च
सुमीनाश्च रूपपाः स्वापदैः सह ॥ तथा कुरुमिनश्चैव सर्वे चैव कठाक्षराः ॥५०॥ ( कारस्करा लोहजंघा राजेया राजभद्रकाः ) ॥ तोसलाः
कोसलाश्चैव त्रैपुरा विदिशास्तथा ॥ ( तुषारास्तुंबुराश्चैव सर्वे चैव करस्कराः ॥ ) नासिक्याद्याश्च ये चान्ये ये चैवोत्तरनर्मदाः ॥ ५१ ॥

Śaṅkaras, Shalmaveshmakas, Gurusvaras, Phalgunakas, people around Venumati River, Guruhas, Chakalas, Ekekshanas, Vajikeshas, Dirghagrivas, Chulikas and Asvakesas.

38. The stars Jyesta, Moola and Poorvashada which occupy the tail indicate the good and bad of those who reside in that region.

39-40. These are the regions and peoples who occupy the left and hind foot of Kūrma (which points to the north-west direction). They are Mandavyas, Chandasaras, Ashwas, Kalanadas, Kuśattas, Ladahas, Stribahyas, Balikas, Nṛśiṁhas, people living around Venumati River, Balavasthas, Dharmabaddhas, Ulūkas, heroic humans, Vajikoshas and Dirghapadas.

41. The stars Uttarashadha, Shravana and Dhanista reside in this part of Kūrma's body and indicate the good and bad of those who reside there.

42-47. These are the regions and peoples who live in the left part of the stomach (body). They are the Kailāsas, Himālayas, Dhanushmans, Vasumans, Kraunchas, Kurubakas, Kshudravinas, Rasalayas, Kaikayas, Bhogaprasthas, Yamunās, Anardvipas, Trigartas, Agnijyas, Ardanas, Ashwamukhas, Prāptas, Chibidas, Keshadharis, Daserakas, Vatadhanas, Shavadhanas, Pushkalas, Adhamas, Kairatas, Mandavyas, Bhutiyuvakas, Shatakas, Hematarakas, Yashomatyas, Gāndhāras, Svarasas, Gararashis, Yaudheyas, Dasameyas, Rājanyas, Syamakas and Kshemadhentas.

48. The three stars Shatabhishak, Pūrvabhādra and Uttarabhādra, which occupy this position, indicate the good and bad of those who reside there.

49-52. These are the regions and peoples who reside in the left front foot of Kūrma which points to the north-east direction. They are the Kinnaras, Pashupalas, Kichakas, Kashmiras, Aabhisaras, Daradas, Anganas, Kulatas, Vanarashtrakas, Sairishtas,

भीरुकच्छाः समाहेयाः सह सारस्वतैरपि ॥ काश्मीराश्च सुराष्ट्राश्च आवन्त्याश्चार्बुदैः सह ॥ ५२ ॥ इत्येते ह्यपरान्ताश्च शृणु विन्ध्यनिवा-
सिनः ॥ सरजाश्च करूषाश्च केरलाश्चोत्कलैः सह ॥५३॥ उत्तमर्णाश्च दशार्णाश्च भोज्याः किष्किन्धकैः सह ॥ तुम्बरास्तुम्बुलाश्चैव पटवी
नैषधैः सह ॥५४॥ अन्नजास्तुष्टिकाराश्च वीरहोत्रा ह्यवन्तयः ॥ एते जनपदाः सर्वे विन्ध्यपृष्ठनिवासिनः ॥५५॥ अतो देशान्प्रवक्ष्यामि पर्व-
ताश्रयिणश्च ये ॥ नीहारा हंसमार्गाश्च कुरवो गुर्गणाः खसाः ॥५६॥ कुन्तप्रावरणाश्चैव ऊर्णा दार्वाः सकूचकाः ॥ त्रिगर्त्ता गाल्वाश्चैव किरा-
तास्तामसैः सह ॥ ५७ ॥ कृतत्रेतादिकश्चात्र चतुर्युगकृतो विधिः ॥ एतत्तु भारतं वर्षं चतुःसंस्थानसंस्थितम् ॥ ५८ ॥ दक्षिणापरतो
ह्यस्य पूर्वेण च महोदधिः ॥ हिमवानुत्तरेणास्य कार्मुकस्य यथा गुणः ॥ ५९ ॥ तदेतद्भारतं वर्षं सर्वबीजं द्विजोत्तम ॥ ब्रह्मत्वममरेशत्वं
देवत्वं मर्त्यतां तथा ॥ ६० ॥ मृगपश्वप्सरोयोनिस्तद्वत्सर्वे सरीसृपाः ॥ स्थावराणां च सर्वेषामितो ब्रह्मन्शुभाशुभैः ॥ ६१ ॥

Brahmapurakas, Vanavahyakas, Kirātas, Kaushikas, Nandas, Pahlavas, Lolanas, Darvas, Damarakas, Kuratas, Annadarakas, Ekapadas, Khashas, Ghoshas, Svargaś, Bhaumas, Anavadyakas,Yavanas, Hingas, Chirapravaranas, Trinetras, Pauravas and Gandharvas. All these occupy the left front foot of Kūrma.

53. The stars Revathi, Ashwini and Bharani which occupy this part indicate the good and bad of those who reside in these regions.

54. Dear sage, I have narrated to you the regions and the stars in the different parts of Kūrma's body so that you will bear them in mind well.

55. If these stars are under some oppression then there will be some distress in the region governed by them. On the other hand, if beneficially placed planets give these stars strength, then the regions will be happy and prosperous.

56. If a planet who is the lord of a particular star is in oppression, there will be fear and distress in the regions governed by the particular star. If the concerned planet is in excellence then there will be peace and prosperity.

57. The peace or distress of a particular region depends upon the disposition of stars and planets.

58. If the personal star of a person becomes inimical, then there will be much fear and agony for the person. When the planets are ill-disposed then the distress caused will be slightly less.

59. The wise men who know astrology have prescribed methods where even an ill-disposed planet will cause prosperity only.

60. When a planet becomes inimical there will be fear regarding one's wealth, cattle, servants, wife, children and relatives. Fear grips even virtuous people.

प्रयाति कर्मभूर्ब्रह्मन्नान्यलोकेषु विद्यते ॥ देवानामपि विप्रर्षे सदा एष मनोरथः ॥ ६२ ॥ अपि मानुष्यमाप्स्यामो देवत्वात्प्रच्युताः
क्षितौ ॥ मनुष्यः कुरुते तत्तु यन्न शक्यं सुरासुरैः ॥ ६३ ॥ तत्कर्मनिगडग्रस्तैः स्वकर्मख्यापनोत्सुकैः ॥ न किंचित्क्रियते कर्म सुख-
लेशोपबृंहितैः ॥ ६४ ॥ इति श्रीमार्कण्डेयपुराणे नद्यादिवर्णनो नाम चतुःपंचाशत्तमोऽध्यायः ॥ ५४ ॥ क्रोष्टुकिरुवाच ॥ भगवन्क-
थितं सम्यग्भवता भारतं मम ॥ सरितः पर्वता देशा ये च तत्र वसन्ति वै ॥ १ ॥ किन्तु कूर्मस्त्वया पूर्वं भारते भगवान्हरिः ॥ कथित-
स्तस्य संस्थानं श्रोतुमिच्छाम्यशेषतः ॥ २ ॥ कथं स संस्थितो देवः कूर्मरूपी जनार्दनः ॥ शुभाशुभं मनुष्याणां व्यज्यते च ततः
कथम् ॥ यथा मुखं यथा पादास्तस्य तद्ब्रूह्यशेषतः ॥ ३ ॥ मार्कण्डेय उवाच ॥ प्राङ्मुखो भगवान्देवः कूर्मरूपी व्यवस्थितः ॥
आक्रम्य भारतं वर्षं नवभेदमिदं द्विज ॥ ४ ॥

61. People who are not virtuous and intent on doing sinful acts are not afraid of anything.

62. A person enjoys good things or suffers from bad things. These are of four kinds. Some are common to all the people who reside in the same region. They are calamities like earthquakes and so on. Good things like moon light, canal water are also like that. Some are due to the king who governs the region. The good and bad things are common to all. Some are caused by the ill disposition of stars and planets. They are also common to all. Some are caused by one's own past deeds. These are not common but unique. A person goes through all these kinds of joys and sorrows.

63. There will be mutual protection when the planets are beneficial. Otherwise, there will be oppression from the very same planets.

64. I have narrated to you the distribution of stars on Kūrma's person. The happiness or distress due to these stars is common to all the regions they govern.

65. So a wise a man determines the star of a particular region and the position of his planets and performs propitiating deeds to avoid the ill-effect of these planets and also public calumny.

66. Daityas and the enemies of the demigods fall from heaven. They are called Lokavadas, spokesman of public opinion.

67. A wise man should not avoid these stainers. Many evil effects will be averted by their false propaganda.

68. When the stars and planets are bad, they cause the destruction of intellect, wisdom and wealth. A good propitiating act destroys all the sins and increases all auspicious things.

69. So when there is trouble due to planets, a wise person should do propitiatory acts.

नवधा संस्थिते ह्यस्य नक्षत्राणि समन्ततः ॥ विषयाश्च द्विजश्रेष्ठ ये सम्यक्तान्निबोध मे ॥ ५ ॥ वेदिमद्रारिमाण्डव्याः शाल्वा
नीपास्तथा शकाः ॥ उज्जिहानास्तथा वत्स घोषसंख्यास्तथा खशाः ॥ ६ ॥ मध्ये सारस्वता मत्स्या शूरसेनाः समाथुराः ॥ धर्मारण्या
ज्योतिषिका गौरग्रीवा गुडाश्मकाः ॥ ७ ॥ वैदेहकाः सपाञ्चालाः संकेताः कङ्कमारुताः ॥ कालकोटिसपाषण्डाः पारियात्रनिवा-
सिनः ॥ ८ ॥ कापिंजलाः कुरोर्बाह्यास्तथैवोदुम्बरा जनाः ॥ गजाह्वयाश्च कूर्मस्य जना मध्यनिवासिनः ॥ ९ ॥ कृत्तिकारोहिणीसौम्या
एतेषां मध्यवासिनाम् ॥ नक्षत्रत्रितयं विप्र शुभाशुभविपाकदम् ॥ १० ॥ वृषध्वजोऽञ्जनश्चैव जम्ब्वाख्यो मानवाचलः ॥ शूर्पकर्णो
व्याघ्रमुखो मुखरः कर्वटाशनः ॥ ११ ॥ तथा चन्द्रेश्वराश्चैव खशाश्च मगधास्तथा ॥ शिवयो मैथिलाः शुभ्रास्तथा वदनदन्तुराः ॥१२ ॥
प्राग्ज्योतिषा सलौहित्याः सामुद्राः पुरुषादकाः ॥ पूर्णोत्कटो भद्रगौरस्तथोदयगिरिर्द्विज ॥ १३ ॥ काशयो मेखला मुष्टास्ताम्रलिप्तैक-
कपादपाः ॥ वर्द्धमाना कोसलाश्च मुखे कूर्मस्य संस्थिताः ॥ १४ ॥

70. He should not harm anyone. He should observe fasts, offer salutations to demigods and elders, perform bathing, *japa* [chanting the names of God], *homas* [fire sacrifices], give away charity and be free from anger.

71. Even creatures should not be harmed. A wise person should have affection for all creatures. One should avoid bad talk and flattering.

72-73. One should offer worship to the planet. By doing like this, all the terrible ill-effects caused by the planets and stars will be nullified. This is the Kūrma form of Lord Viṣṇu which is present in Bharāta-varṣa.

74. Nārāyaṇa has unthinkable prowess. He is the receptacle of all things and beings, including demigods. The demigods are present in the stars also.

75-80. In the central part of Kūrma there are Agni, Pṛthvī and Candra and also the three constellations Mesha, Vrshabha and Mithuna. The constellations Mithuna and Karkataka are situated in the face. Karkataka and Siṁha are located in the front right foot. The three constellations Siṁha, Kanyā and Tulā are in the stomach. Tulā and Vrshcika are in the right hind foot. Vrshchika and Dhanus are located in the tail. Dhanus, makara and kumbha are located in the north-west foot. Kumbha and Meena are located in the other side of the stomach. Meena and Mesha are located in the north-east foot.

81. The various regions and stars are located on the body of Kūrma. The constellations subsist in these regions and stars.

82. When the stars and planets are in oppression, one should anticipate distress in the entire region governed by these stars and planets.

83. One should bathe first and then perform austerities. Dear sage, this is the form of Viṣṇu present in the planets.

रौद्रं पुनर्वसुः पुष्यो नक्षत्रत्रितयं मुखे ॥ पादे तद्दक्षिणे देशाः क्रोष्टुके वदतः शृणु ॥ १५ ॥ कलिङ्गवङ्गजठराः कोशला मूषिकास्तथा ॥
चेदयश्चोर्ध्वकर्णाश्च मत्स्यान्धा विन्ध्यवासिनः ॥ १६ ॥ विदर्भा नारिकेलाश्च धर्मद्वीपास्तथैलिकाः ॥ व्याघ्रग्रीवा महाग्रीवास्त्रैपुराः श्मश्रु-
धारिणः ॥ १७ ॥ कैष्किन्ध्या हैमकूटाश्च निषधाः कटकस्थलाः ॥ दशार्णा हारिका नग्ना निषधाः काकुलालकाः ॥ १८ ॥ तथैव पर्ण-
शबराः पादे वै पूर्वदक्षिणे ॥ आश्लेषर्क्षं तथा पैत्र्यं फाल्गुन्यः प्रथमास्तथा ॥ १९ ॥ नक्षत्रत्रितयं पादमाश्रितं पूर्वदक्षिणम् ॥ लंकाका-
लाजिनाश्चैव शैलिका निकटास्तथा ॥२०॥ महेन्द्रमलयाद्रौ च दर्दुरे च वसन्ति ये ॥ कर्कोटकवने ये च भृगुकच्छाः सकोङ्कणाः ॥२१॥
सर्वाश्चैव तथाभीरा वेण्यास्तीरनिवासिनः ॥ अवन्तयो दासपुरास्तथैवाकारिणो जनाः ॥२२॥ महाराष्ट्राः सकर्णाटा गोनर्दाश्चित्रकूटकाः ॥
चोलाः कौलगिराश्चैव क्रौञ्चद्वीपजटाधराः ॥ २२ ॥ कावेरीऋष्यमूकस्था नासिक्याश्चैव ये जनाः ॥ शंखशुक्त्यादिवैदूर्यशैलप्रान्तचर-
राश्च ये ॥ २४ ॥ तथा वारिचराः कोलाश्चर्मपट्टनिवासिनः ॥ गणवाह्याः पराः कृष्णाद्वीपवासनिवासिनः ॥ २५ ॥

## Chapter 6 (Adhyāya 56)

1-2. Mārkaṇḍeya said: Dear sage, I have narrated to you Bharāta-varṣa in detail. The four *yugas* Kṛta, Tretā, Dvāpara and Kali are operative here only. The four castes also exist here. The maximum life spans of those who live there are 400 years, 300 years, 200 years and 100 years in the four *yugas* respectively.

3. The *varṣa* which is to the right of the mountain Devakūṭa is called Bhadrāśva. Listen to the details of Bhadrāśva as I narrate it to you.

4-5. The five important mountains here are Śvetaparna, Nīla, Shaivala, Kauranja and Parnashalagra. There are many small mountains which are the off-shoots of these five.

6. There are many groups of people in the regions of these mountains. They are called Kumudasankashas, Shuddasanus and sumangalas and many other such types the hundreds and thousands.

7. There are many wide, rivers having cool and pure water: Seetha, Śaṅkhavati, Bhadrā, Chakravarta and so on.

8-9. The people who live here are very fair-complexioned like the conch and gold. They interact with demigods, are very pious and live for a thousand years. There is no gradation there—all are equal—all are endowed with all virtues like patience, forbearance, etc.

10. Viṣṇu is there in the form of Hayagrīva. His limbs are the head, chest, genitals, feet, hands and he has three eyes. He covers the entire Bhadrāśva-varṣa just as Kūrma covers Bharāta-varṣa by His body.

11-14. Ketumāla-varṣa is to the west of Meru. The seven important mountains there are Vishāla, Kambala, Kṛṣṇa, Jayanta,

सूर्यांद्रो कुमुदाद्रो च ते वसन्ति तथा जनाः ॥ रौद्रस्वनाः सपिशिकास्तथा ये कर्मनायकाः ॥ २६ ॥ दक्षिणाः कौरुषा ये च ऋषिका-
स्तापसाश्रमाः ॥ ऋषभाः सिंहलाश्चैव तथा कांचीनिवासिनः ॥ २७ ॥ त्रिलिङ्गाः कुञ्जरदरीकच्छवासाश्च ये जनाः ॥ ताम्रपर्णी तथा
कुक्षिरिति कूर्मस्य दक्षिणः ॥ २८ ॥ फाल्गुन्यश्चोत्तराहस्ताश्चित्रा चर्क्षत्रयं द्विज ॥ कूर्मस्य दक्षिणे कुक्षौ बाह्यपादस्तथापरम् ॥ २९ ॥
काम्बोजाः पल्हवाश्चैव तथैव वडवामुखाः ॥ तथा च सिन्धुसौवीराः सानर्त्ता वनितामुखाः ॥ ३० ॥ द्रावणाः सार्गिगाः शूद्राः कर्णप्राधेय-
बर्बराः ॥ किराताः पारदाः पाण्ड्यास्तथा पारशवाः कलाः ॥ ३१ ॥ धूर्त्तकाः हैमगिरिकाः सिन्धुकालककैरताः ॥ सौराष्ट्रा दरदाश्चैव
द्राविडाश्च महार्णवाः ॥३२ ॥ एते जनपदाः पादे स्थिता वै दक्षिणेऽपरे ॥ स्वात्यो विशाखा मैत्रं च नक्षत्रत्रयमेव च ॥३३॥ मणिमेघक्षु-
राद्रिश्च संजयोऽस्तगिरिस्तथा ॥ अपरान्तिका नोहयाश्च शान्तिका विप्रशस्तकाः ॥ ३४ ॥ कोंकणाः पंचनदका वमना ह्यवरास्तथा ॥
तारक्षुराः ह्यंगतकाः शर्कराः शाल्मवेश्मकाः ॥ ३५ ॥

गुरुस्वराः फाल्गुनका वेणुमत्यां च ये जनाः ॥ तथा फल्गुलुका घोरा गुरुहाश्चकलास्तथा ॥ ३६ ॥ एकेक्षणा वाजिकेशा दीर्घग्रीवाः
सचूलिकाः ॥ अश्वकेशास्तथा पुच्छे जनाः कूर्मस्य संस्थिताः ॥ ३७ ॥ ऐन्द्रं मूलं तथापाढानक्षत्रत्रयमेव च ॥ माण्डव्याश्चंडखाराश्च
अश्वकालनदास्तथा ॥३८॥ कुशात्ता लडहाश्चैव स्त्रीबाह्या वालिकास्तथा ॥ नृसिंहा वेणुमत्यां च वलावस्थास्तथापरे ॥ ३९ ॥ धर्मबद्धा-
स्तथोलूका उरुकर्मस्थिता जनाः ॥ ( तथा फल्गुलका घोरा गुरुहा हेमतारकाः ॥ एकेक्षणा वाजिकोशा दीर्घपादास्तथैव च ॥ ) वामे परे
जनाः पादे स्थिताः कूर्मस्य भागुरे ॥४०॥ आषाढाश्रवणे चैव धनिष्ठा यत्र संस्थिता ॥ कैलासो हिमवांश्चैव धनुष्मान्वसुमांस्तथा ॥४१॥
क्रौंचाः कुरुवकाश्चैव क्षुद्रवीणाश्च ये जनाः॥ रसालयाः सकैकेया भोगप्रस्थाः सयामुनाः ॥ ४२ ॥ अन्तर्द्वीपास्त्रिगर्त्ताश्च अग्निज्याः सार्द-
ना जनाः ॥ तथैवाश्वमुखाः प्राप्ताश्चिविडाः केशधारिणः ॥ ४३ ॥ दासेरका वाटधानाः शवधानास्तथैव च ॥ पुष्कलाधमकैरातास्तथा
तक्षशिलाश्रयाः ॥ ४४ ॥ अम्बष्ठा मालवा मद्रा वेणुकाः सवदन्तिकाः ॥ पिङ्गला गानकलहा हूणाः कोहलकास्तथा ॥ ४५ ॥

Hari, Vishoka and Vandhamana. There are thousands of other mountains in the intermediate space wherein many types of people live. They are classified into many types as Mauli, Mahakaya, Śākapota, Karambhaka, Achyuta and so on.

15. They drink the waters of the great rivers Vankshushyama, Svakamabala, Amogha, Kāmiṇī, Shyāma and thousands of others.

16-17. Even here the people live for a thousand years. The Varāha form of Viṣṇu covers the entire *varṣa* by His limbs as does Kūrma and Hayagreeva described above. As in the previous case, nine triads of stars cover the entire *varṣa* (as described earlier in Bharātvarṣa). I have described to you the Ketumāla-varṣa.

18-19. I will narrate to you the features of the Uttarakuru-varṣa. There the trees bearing flowers and sweet fruits all through the year. The trees give costumes, ornaments and whatever one asks for.

20. Wind carries sweet scent. People who fall from heaven are born there.

21-25. People give birth to twins. Their life spans are equal. They are affectionate to each other like a pair of *cakravaka* birds. They live for 14,500 years. There are two mountains Candrakanta and Sūryakānta there. Between them, flows the great river Bhadrasoma with cool and pure waters. There are thousands of other rivers also. And there are rivers of milk and ghee in that *varṣa*. There are lakes of curds. There are thousands of trees in the forests there bearing sweet fruits.

26-27. There also Viṣṇu is present in his Matsya form, His head facing the east. His body consists of nine parts. The entire *varṣa* is covered by his body and a triad of stars, as in the case of Bharāta-varṣa, occupies each part of the body, governing the regions that come there.

28. There are two islands in the ocean beyond the Uttarakuru-varṣa: Candra-dvīpa and Bhadra-dvīpa. Both of them are very holy

माण्डव्या भूतियुपकाः शातका हेमतारकाः ॥ यशोमत्याः सगान्धाराः खरसा गरराशयः ॥ ४६ ॥ यौधेया दासमेयाश्च राजन्याः श्याम-
कास्तथा ॥ क्षेमधूर्त्ताश्च कूर्मस्य वामकुक्षिमुपाश्रिताः ॥ ४७ ॥ वारुणं चात्र नक्षत्रं तद्वत्प्रोष्ठपदाद्वयम् ॥ येन किन्नरराज्यं च पशु-
पालं सकीचकम् ॥ ४८ ॥ काश्मीरकं तथा राष्ट्रमभिसारजनस्तथा ॥ दरदास्त्वंगणाश्चैव कुलूटा वनराष्ट्रकाः ॥४९॥ सैरिष्ठा ब्रह्मपुरका-
स्तथैव वनवाह्यकाः ॥ किरातकौशिका नन्दा जनाः पह्लवलोलनाः ॥ ५० ॥ दार्वा दामरकाश्चैव कुरटाश्चान्नदारकाः ॥ एकपादाः खशा
घोषाः स्वर्गभौमानवद्यकाः ॥ ५१ ॥ तथा सयवना हिंगाश्चीरप्रावरणाश्च ये ॥ त्रिनेत्राः पौरवाश्चैव गन्धर्वाश्च द्विजोत्तम ॥ ५२ ॥ पूर्वो-
त्तरं तु कूर्मस्य पादमेते समाश्रिताः ॥ रेवत्यश्चाश्विदैवत्यं याम्यं चर्क्षमिति त्रयम् ॥ ५३ ॥ तत्र पादे समाख्यातं पाकाय मुनिसत्तम ॥
देशेष्वेतेषु चैतानि नक्षत्राण्यपि वै द्विज ॥ ५४ ॥ एतत्पीडा अमी देशाः पीड्यन्ते ये क्रमोदिताः ॥ यान्ति चाभ्युदयं विप्र ग्रहैः
सम्यगवस्थितैः ॥ ५५ ॥

यस्यर्क्षस्य पतिर्यो वै ग्रहस्तद्भावतो भयम् ॥ तद्देशस्य मुनिश्रेष्ठ तदुत्कर्षे शुभागमः ॥ ५६ ॥ प्रत्येकं देशसामान्यं नक्षत्रग्रहसम्भवम् ॥
भयं लोकस्य भवति शोभनं वा द्विजोत्तम ॥ ५७ ॥ स्वर्क्षैरशोभनैर्जन्तोः सामान्यमिति भीतिदम् ॥ ग्रहैर्भवति पीडोत्थमल्पधायासम-
शोभनम् ॥ ५८ ॥ तथैव शोभनः पाको दुःस्थितैश्च तथा ग्रहैः ॥ अल्पोपकाराय नृणां देशज्ञैरुदितो बुधैः ॥ ५९ ॥ द्रव्ये गोष्ठेऽथ
भृत्येषु सुहृत्सु तनयेषु वा ॥ भार्यायां च ग्रहे दुःस्थे भयं पुण्यवतां नृणाम् ॥६०॥ आत्मन्यथाल्पपुण्यानां सर्वत्रैवातिपापिनाम् ॥ नैक-
त्रापि ह्यपापानां भयमस्ति कदाचन ॥६१॥ दिग्देशजनसामान्यं नृपसामान्यमात्मजम् ॥ नक्षत्रग्रहसामान्यं नरो भुंक्ते शुभाशुभम् ॥६२॥
परस्पराभिरक्षा च ग्रहदौस्थ्येन जायते ॥ एतेभ्य एव विप्रेन्द्र शुभहानिस्तथाशुभैः ॥ ६३ ॥ यदेतत्कूर्मसंस्थानं नक्षत्रेषु मयोदितम् ॥
एतत्तु देशसामान्यमशुभं शुभमेव च ॥ ६४ ॥

and famous. This is the Uttarakuru-varṣa, I have narrated to you. Listen to Kimpuruṣa and other *varṣas*, as I narrate it to you.

## Chapter 7 (Adhyāya 57)

1-3. Mārkaṇḍeya said: I will narrate to you the features of Kimpuruṣa-varṣa. There, the life of people is 10,000 years. Men and women who live there are free from all kinds of diseases and sorrow. There is a great Plakṣa tree there. Men and women who consume the juice of the fruits of the tree are always young and sweet smelling like a blue lotus flower.

4-6. Hari-varṣa lies beyond Kimpuruṣa. People who live there are fair-complexioned. They are those who have fallen from heaven. They appear like demigods. Sugarcane juice is the food of all those who live in this *varṣa*. There is no old age there. They live for a full 10,000 years without aging.

7-10. Ilāvṛta-varṣa is at the center of Jambū-dvīpa. Sunrays do not fall in that *varṣa*. Neither do moon's rays enter there. People are always young without any sign of old age. The rays of the planet and stars also do not reach there. The only thing that shines is Meru mountain itself. The people who live there have the luster of a lotus, their scent is also like that of the lotus. They use the juice of Jambū fruits as their food. People live for 13,000 years there. Meru occupies the center of Ilāvṛta which resembles a bowl.

[Translator's note: This is the transliteration:

*sharavakarasamstaro merumadhye ilavrte!*
*merus tatra mahashailas tadakhyatam ilavratam!*

The dictionary meaning of *sharava* is "a shallow dish, platter, an earthen tray."]

तस्माद्विज्ञाय देशर्क्षं ग्रहपीडां तथात्मनः ॥ कुर्वीत शान्तिं मेधावी लोकवादांश्च सत्तम ॥ ६५ ॥ आकाशाद्देवतानां च दैत्यादीनां च
दौर्हृदाः ॥ पृथ्व्यां पतन्ति ते लोके लोकवादा इति श्रुताः ॥ ६६ ॥ तां तथैव बुधः कुर्याल्लोकवादान्न नाशयेत् ॥ तेषां तत्करणान्नृणां
युक्तो दुष्टागमक्षयः ॥ ६७ ॥ शुभोदयं ग्रहाणि च पापानां द्विजसत्तम ॥ प्रज्ञाहानिं प्रकुर्वन्ते द्रव्यादीनां च कुर्वते ॥ ६८ ॥ तस्मा-
च्छान्तिपरः प्राज्ञो लोकवादरतस्तथा ॥ लोकवादांश्च शान्तिश्च ग्रहपीडासु कारयेत् ॥ ६९॥ अद्रोहात्तुपवासांश्च शस्तं देवादिवन्दनम् ॥
जपो होमस्तथा दानं स्नानं क्रोधादिवर्जनम् ॥ ७० ॥ अद्रोहं सर्वभूतेषु मैत्रीं कुर्याच्च पण्डितः ॥ वर्जयेदसतीं वाचमतिवादांस्तथैव
च ॥ ७१ ॥ ग्रहपूजां च कुर्वीत सर्वपीडासु मानवः ॥ एवं शाम्यन्त्यशेषाणि घोराणि द्विजसत्तम ॥ ७२ ॥ प्रयतानां मनुष्याणां ग्रहर्क्षो-
त्थान्यशेषतः ॥ एष कूर्मो मया ख्यातो भारते भगवान्विभुः ॥ ७३ ॥

नारायणो ह्यचिन्त्यात्मा यत्र सर्वं प्रतिष्ठितम् ॥ अत्र देवाः स्थिताः सर्वे प्रतिनक्षत्रसंश्रयाः ॥ ७४ ॥ तथा मध्ये हुतवहः पृथ्वी सोमश्च
वै द्विज ॥ मेषादयस्त्रयो मध्ये मुखे द्वौ मिथुनादिकौ ॥ ७५ ॥ प्राग्दक्षिणे तथा पादे कर्किसिंहौ व्यवस्थितौ ॥ सिंहकन्यातुलाश्चैव कुक्षौ
राशित्रयं स्थितम् ॥ ७६ ॥ तुलाथ वृश्चिकश्चोभौ पादे दक्षिणपश्चिमे ॥ पृष्ठे च वृश्चिकेनैव सह धन्वी व्यवस्थितः ॥ ७७ ॥ वायव्ये
चास्य वै पादे धनुर्ग्राहादिकं त्रयम् ॥ कुम्भमीनौ तथैवास्य उत्तरां कुक्षिमाश्रितौ ॥ ७८ ॥ मीनमेषौ द्विज श्रेष्ठपादे पूर्वोत्तरे स्थितौ ॥
कूर्मे देशान्तथर्क्षाणि देशेष्वेतेषु वै द्विज ॥७९॥ राशयश्च तथर्क्षेषु ग्रहराशिष्ववस्थिताः ॥ तस्माद्ग्रहर्क्षपीडासु देशपीडां विनिर्दिशेत् ॥ ८०॥
तत्र स्नात्वा प्रकुर्वीत दानहोमादिकं विधिम् ॥ स एष वैष्णवः पादो ब्रह्मन्मध्ये ग्रहस्य यः ॥ ८१ ॥ (नारायणाख्योऽचिन्त्यात्मा कारणं
जगतः प्रभुः ॥ ) इति श्रीमार्कण्डेयपुराणे भारतीयकूर्मनिवेशो नाम पंचपंचाशत्तमोऽध्यायः ॥ ५५ ॥

11-12. Ramyaka-varṣa is next to Ilāvṛta-varṣa on the north. There is a mighty banyan tree and it is always green. The people who live there use the juice of the fruits of that tree as their food. They live for 10,000 years. They are always joyous without any sign of old age.

13. The *varṣa* which lies to the north of Ramyaka is Hiraṇmaya. There, the river Hiranvati flows. Lotuses abound in that river. The people who live there are endowed with great strength and personality. They are wealthy and are always good to look at.

[Translator's Note: Ilāvṛta, though squarish in shape, resembles an inverted earthen vessel or tray.]

मार्कण्डेय उवाच ॥ एवं तु भारतं वर्षं यथावत्कथितं मुने ॥ कृतं त्रेता द्वापरं च तथा तिष्यं चतुष्टयम् ॥ १ ॥ अत्रैवैतद्युगानां तु
चातुर्वर्ण्यं च वै द्विज ॥ चत्वारि त्रीणि द्वे चैव तथैकं च शरच्छतम् ॥२॥ जीवन्त्यत्र नरा ब्रह्मन्कृतत्रेतादिषु क्रमात् ॥ देवकूटस्य पूर्वस्य
शैलेन्द्रस्य महात्मनः ॥ ३ ॥ पूर्वेण यत्स्थितं वर्षं भद्राश्वं तन्निबोध मे ॥ श्वेतपर्णश्च नीलश्च शैवालश्चाचलोत्तमः ॥४॥ कौरञ्जः पर्णशा-
लाग्रः पञ्चैते तु कुलाचलाः ॥ तेषां प्रसूतिरन्ये ये बहवः क्षुद्रपर्वताः ॥ ५ ॥ तैर्विशिष्टा जनपदा नानारूपाः सहस्रशः ॥ ततः कुमुदसं-
काशाः शुद्धसानुसुमङ्गलाः ॥ ६ ॥ इत्येवमादयोऽन्येऽपि शतशोऽथ सहस्रशः ॥ सीताशङ्खावतीभद्राचक्रावर्त्तादिकास्तथा ॥७॥ नद्योऽ-
थ बह्व्यो विस्तीर्णाः शीततोयौघवाहिकाः ॥ अत्र वर्षे नराः शङ्खशुद्धहेमसमप्रभाः ॥ ८ ॥ दिव्यसङ्गमिनः पुण्या दशवर्षशतायुषः ॥
अधमोत्तमं न तेष्वस्ति सर्वे ते समदर्शनाः ॥ ९ ॥

तितिक्षादिभिरष्टाभिः प्रकृत्यात्मगुणैर्युताः ॥ तत्राप्यश्वशिरा देवश्चतुर्बाहुर्जनार्दनः ॥ १० ॥ शिरोहृदयमेढ्राङ्घ्रिहस्तैश्चाक्षित्रयान्वितः ॥
तस्याप्यथैवं विषया विज्ञेया जगतः प्रभोः ॥ ११ ॥ केतुमालमतो वर्षं निबोध मम पश्चिमम् ॥ विशालः कम्बलः कृष्णो जयन्तो हरि-
पर्वतः ॥ १२ ॥ विशोको वर्द्धमानश्च सप्तैते कुलपर्वताः ॥ अन्ये सहस्रशः शैला येषु लोकगणः स्थितः ॥ १३ ॥ मौलयस्ते महाकायाः
शाकपोतकरम्भकाः ॥ अच्चुलप्रमुखाश्चापि वसन्ति शतशो जनाः ॥ १४ ॥ ये पिबन्ति महानद्यो वंक्षुश्यामां स्वकम्बलाम् ॥ अमोघां
कामिनीं श्यामां तथैवान्याः सहस्रशः ॥१५॥ अत्राप्यायुः समं पूर्वैस्त्रापि भगवान्हरिः ॥ वराहरूपी पादास्यहृत्पृष्ठे पार्श्वतस्तथा ॥१६॥
( मुखे नासादतश्चैव कण्ठतः पुच्छतस्तथा ) ॥ त्रिनक्षत्रयुते देशे नक्षत्राणि युतानि च ॥ इत्येतत्केतुमालं ते कथितं मुनिसत्तम ॥ १७॥

अतः परं कुरून्वक्ष्ये निबोधेह ममोत्तरान् ॥ तत्र वृक्षा मधुफला नित्यपुष्पफलोपगाः ॥ १८ ॥ वस्त्राणि च प्रसूयन्ते फलेष्वाभरणानि
च ॥ सर्वकामप्रदास्ते हि सर्वकालफलप्रदाः ॥ १९ ॥ भूमिर्मणिमयी वायुः सुगन्धः सर्वदा सुखः ॥ जायन्ते मानवास्तत्र देवलोकपरि-
च्युताः ॥ २० ॥ मिथुनानि प्रसूयन्ते समकालस्थितानि वै ॥ अन्योन्यमनुरक्तानि चक्रवाकोपमानि च ॥२१॥ चतुर्दश सहस्राणि तेषां
सार्द्धानि वै स्थितिः ॥ चन्द्रकान्तश्च शैलेन्द्रः सूर्यकान्तस्तथापरः ॥ २२ ॥ तस्मिन्कुलाचले वर्षे तन्मध्ये च महानदी ॥ भद्रसोमा
प्रयात्युर्व्यां पुण्यामलजलौघिनी ॥ २३॥ सहस्रशस्तथैवान्या नद्यो वर्षेऽपि चोत्तरे ॥ तथान्याः क्षीरवाहिन्यो घृतवाहिन्य एव च ॥२४॥
दध्नो ह्रदास्तथा तत्र तथान्ये चानुपर्वताः ॥ अमृतास्वादकल्पानि फलानि विविधानि च ॥ २५ ॥ वनेषु तेषु रम्याणि शतशोऽथ सह-
स्रशः ॥ तत्रापि भगवान्विष्णुः प्राक्शिरा मत्स्यरूपवान् ॥ २६ ॥ विभक्तो नवधा विप्र नक्षत्राणां त्रयं त्रयम् ॥ देशास्तत्रापि नवधा
विभक्ता मुनिसत्तम ॥ २७ ॥
चन्द्रद्वीपः समुद्रे च भद्रद्वीपस्तथापरः ॥ तत्रापि पुण्यो विख्यातः समुद्रान्तमहामुने ॥ २८ ॥ इत्येतत्कथितं ब्रह्मन्कुरुवर्षं मयोत्तरम् ॥
शृणु किंपुरुषादीनि वर्षाणि गदतो मम ॥ २९ ॥ इति श्रीमार्कण्डेयपुराणे उत्तरकुरुकथनं नाम षट्पंचाशोऽध्यायः ॥ ५६ ॥ मार्कण्डे-
य उवाच ॥ यत्तु किम्पुरुषं वर्षं तत्प्रवक्ष्याम्यहं द्विज ॥ तत्रायुर्दशसाहस्रं पुरुषाणां वपुष्मताम् ॥ १ ॥ अनामयाह्यशोकाश्च नरा यत्र
तथा स्त्रियः ॥ प्लक्षः खण्डश्च यत्रोक्तः सुमहान्नन्दनोपमः ॥२॥ तस्य ते वै फलरसं पिबन्तः पुरुषाः सदा ॥ स्थिरयौवननिष्पन्नाः स्त्रिय-
श्चोत्पलगन्धिकाः ॥ ३ ॥ अतः परं किंपुरुषाद्धरिवर्षं प्रचक्षते ॥ महारजतसंकाशा जायंते तत्र मानवाः ॥४॥ देवलोकच्युताः सर्वे देव-
रूपाश्च सर्वशः ॥ हरिवर्षे नराः सर्वे पिबन्तीक्षुरसं शुभम् ॥ ५ ॥ न जरा बाधते तत्र न जीर्यन्ते च कर्हिचित् ॥ तावन्तमेव ते कालं
जीवन्त्यथ निरामयाः ॥ ६ ॥

02_MarkandeyaDG-BApril12.pmd 207 5/3/2007, 3:36 PM

मेरुवर्षं मया प्रोक्तं मध्यमं यदिलावृतम् ॥ न तत्र सूर्यस्तपति न ते जीर्यन्ति मानवाः ॥ ७ ॥ लभन्ते नात्मलाभं च रश्मयश्चन्द्र-
सूर्ययोः ॥ नक्षत्राणां ग्रहाणां च मेरोस्तत्र परा द्युतिः ॥ ८ ॥ पद्मप्रभाः पद्मगन्धा जम्बूफलरसाशिनः ॥ पद्मपत्रायताक्षास्तु जायन्ते
तत्र मानवाः ॥ ९ ॥ वर्षाणां तु सहस्राणि तत्राप्यायुस्त्रयोदश ॥ शरावाकारसंस्तारो मेरुमध्ये इलावृते ॥ १० ॥ मेरुस्तत्र महाशैलस्त-
दाख्यातमिलावृतम् ॥ रम्यकं वर्षमस्माच्च कथयिष्ये निबोध तत् ॥ ११ ॥ वृक्षस्तत्रापि चोत्तुङ्गो न्यग्रोधो हरितच्छदः ॥ तस्यापि
ते फलरसं पिबन्तो वर्तयन्ति वै ॥ १२ ॥ वर्षायुतायुषस्तत्र नरास्तत्फलभोगिनः ॥ रतिप्रधानविमला जरादौर्गन्ध्यवर्जिताः ॥ १३ ॥
तस्मादथोत्तरं वर्षं नाम्ना ख्यातं हिरण्मयम् ॥ हिरण्वती नदी यत्र प्रभूतकमलोज्ज्वला ॥ १४ ॥ महाबला सतेजस्का जायन्ते तत्र मान-
वाः ॥ महाकाया महासत्त्वा धनिनः प्रियदर्शनाः ॥ १५ ॥ इति श्रीमार्कण्डेयपुराणे भुवनकोशवर्णनं नाम सप्तपञ्चाशोऽध्यायः ॥ ५७ ॥

02_MarkandeyaDG-BApril12.pmd 209 5/3/2007, 3:36 PM